# ॥ श्रीगणेशसूक्तम् ॥

आ तू न॑ इन्द्र क्षु॒मन्तं᳚ चि॒त्रं ग्रा॒भं सं गृ॑भाय। म॒हा॒ह॒स्ती दक्षि॑णेन॥ वि॒द्मा हि त्वा᳚ तुविकू॒र्मिं तु॒विदे᳚ष्णं तु॒वीम॑घम्। तु॒वि॒मा॒त्रमवो᳚भिः॥ न॒हि त्वा᳚ शूर दे॒वा न मर्ता᳚सो॒ दित्स᳚न्तम्। भी॒मं न गां वा॒रय᳚न्ते॥ एतो॒न्विन्द्रं॒ स्तवा॒मेशा᳚नं॒ वस्वः॑ स्व॒राज᳚म्। न राध॑सा मर्धिषन्नः॥ प्र स्तो᳚ष॒दुप॑ गासिष॒च्छ्रव॒त्साम॑ गी॒यमा᳚नम्। अ॒भि राध॑सा जुगुरत्॥ आ नो᳚ भर॒ दक्षि॑णेना॒भि स॒व्येन॒ प्र मृ॑श। इन्द्र॒ मा नो॒ वसो॒र्निर्भा᳚क्॥ उप॑ क्रम॒स्वा भ॑र धृष॒ता धृ॑ष्णो॒ जना᳚नाम्। अदा᳚शूष्टरस्य॒ वेदः॑॥ इन्द्र॒ य उ॒ नु ते॒ अस्ति॒ वाजो॒ विप्रे᳚भिः॒ सनि॑त्वः। अ॒स्माभिः॒ सु तं स॑नुहि॥ स॒द्यो॒जुव॑स्ते॒ वाजा᳚ अ॒स्मभ्यं᳚ वि॒श्वश्च᳚न्द्राः। वशै᳚श्च म॒क्षू जर॑न्ते॥ नि षु सी᳚द गणपते ग॒णेषु॒ त्वामा᳚हु॒र्विप्र॑तमं कवी॒नाम्। न ऋ॒ते त्वत्क्रि॑यते॒ किं च॒नारे म॒हाम॒र्कं म॑घवञ्चि॒त्रम॑र्च॥ अ॒भि॒ख्या नो᳚ मघव॒न्नाध॑माना॒न्त्सखे᳚ बो॒धि व॑सुपते॒ सखी᳚नाम्। रणं᳚ कृधि रणकृत्सत्यशु॒ष्माभ॑क्ते चि॒दा भ॑जा रा॒ये अ॒स्मान्॥ ग॒णानां᳚ त्वा ग॒णप॑तिं हवामहे क॒विं क॑वी॒नामु॑प॒मश्र॑वस्तमम्। ज्ये॒ष्ठराजं॒ ब्रह्म॑णां ब्रह्मणस्पत॒ आ नः॑ शृ॒ण्वन्नू॒तिभिः॑ सीद॒ साद॑नम्॥ ॐ शान्तिः॒ शान्तिः॒ शान्तिः॑॥